# <u>શ્રી યંત્રોધારક હનુમત્ સ્તોત્રં</u>

નમામિ દૂતં રામસ્ય સુખદં ચ સુરદ્રુમમ્
પીનવૃત્ત મહાબાહું સર્વ શતૃ નિવારણં ||1||
નાનારત્ન સમાયુક્તં કુંડલાદિ વિરાજિતમ્
સર્વદાભીષ્ઠદાતરાં સતાં વૈ ધૃઢમાવહે ||2||
વાસિનં ચક્ર તીર્થસ્ય દક્ષિણસ્થ ગિરૌસદા
તુંગાંબોધિ તરંગસ્ય વાતેન પરિશોભિતે ||3||
નાનાદેશગતૈઃ સદ્ભિઃ સેવ્યમાનં નૃપોત્તમૈઃ
ધૂપદીપાદિ નૈવેદૈઃ પંચખાદ્યૈશ્ચશક્તિતઃ ||4||
ભજામિ શ્રી હનૂમતં હેમકાંતિ સમપ્રભમ્
વ્યાસતીર્થ યતીંદ્રેણ પૂજિતં પ્રણિધાનતઃ ||5||
ત્રિવારં યઃ પઠેન્નિત્યં સ્તોત્રં ભક્ત્યા દ્વિજોત્તમઃ
વાંછિતં લભતે ભીષ્ટં ષણ્માસાભ્યંતરે ખલુ ||6||
પુત્રાર્થિ લભતે પુત્રાન્ યશાર્થિ લભતે યશઃ
વિધાર્થિ લભતે વિધાં ધનાર્થિ લભતે ધનં ||7||
સર્વથા માસ્તુ સંદેહો હરિઃ સાક્ષી જગત્પતિઃ
યઃકરોત્યત્ર સંદેહં સયાતિ નરકં ધૃવમ્||8||
ઇતિ શ્રી યંત્રોધારક હનુમત્ સ્તોત્રં પરિપૂર્ણ ||